# वैदिके लौकिके च संस्कृतसाहित्ये पर्यावरणम्

**माधव प्रसाद जोशी**
**वरिष्ठानुसन्धाता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**

**द्यौः शान्तिरन्तरिक्षं शान्तिः पृथ्वीशान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः शामाशान्तिरेधि ॥**

## सारांशः

पर्यावरणेन प्रकृत्या सह वा मानवस्य घनिष्ठः सम्बन्धः वर्तते। पर्यावरणं विना जीवनस्य कल्पनाम् अपि कर्तुं न शक्नुमः। जलं, वायुः, पृथ्वी, अग्निः, आकाशः, नद्यः, वनानि, प्राणिनः, पर्वताः, वृक्षलतादयः पर्यावरणीयतत्त्वानि सन्ति। एतेषां सर्वेषां संरक्षणेन संवर्धनेन एव पर्यावरणं स्वच्छं तिष्ठति। स्वच्छेन सुन्दरेण पर्यावरणेन एव मानवजीवनं सुखि समृद्धशालि च भवितुम् अर्हति। अधुना समग्रम् अपि विश्वं विकासस्य प्रतिस्पर्धायां पर्यावरणीयतत्त्वानाम् अत्यधिकम् उपयोगं हानिं च कुर्वत् अस्ति इत्यतः पर्यावरणे असन्तोलनम् उत्पन्नम् अस्ति। अतः पर्यावरणस्य संरक्षणम् अत्यावश्यकम्। तदा एव विकासेन वयं लाभान्विताः भवितुं शक्नुयाम। पर्यावरणस्य संरक्षणाय अस्माकं वैदिके लौकिके च संस्कृतसाहित्ये बहुधा चर्चा विहिता वर्तते। अस्मिन् शोधपत्रे वैदिके लौकिके च संस्कृतसाहित्ये कृता पर्यावरणसम्बद्धा चर्चा संक्षेपेण कृता अस्ति।

## प्रस्तावना

समग्रं संस्कृतसाहित्यं वैदिकं लौकिकं च इति कृत्वा द्विधा विभक्तम् अस्ति। वेदेषु सनातनसंस्कृतेः ज्ञानराशयः सन्ति। न केवलं पारलौकिकम् अपि तु लौकिकम् अपि ज्ञानं वेदेषु वर्तते। लौकिकसमुन्नतेः पारलौकिकसमुन्नतेः च इति उभयविधायाः समुन्नतेः अपि साधनं वेदेषु उक्तम् अस्ति। एवं वेदाः विविधज्ञानमयाः सन्ति। वैदिके साहित्ये चत्वारः वेदाः उपवेदाः तेषाम् आरण्यकग्रन्थाः ब्राह्मणग्रन्थाः षट् वेदाङ्गानि उपनिषदः सूत्रग्रन्थाः च सन्ति। वेदस्य एव विस्ताराय पुराणानाम् आविर्भावः जातः। स्मृतयः पुराणानि महाभारतं रामायणं वेदस्यैव गूढार्थं प्रतिपादयन्ति। लौकिके संस्कृतसाहित्ये रामायणं महाभारतं पुराणानि स्मृतयः च अन्तर्भवन्ति।

पर्यावरणम् इति शब्दः (परि+आ+वृ+ल्युट्) 'परि' 'आङ्' इति उपसर्गपूर्वकात् 'वृञ् वरणे' इति धातोः ल्युट्-प्रत्ययेन सिद्ध्यति यस्य अर्थः भवति परितः आवृतम्। यद्यपि प्राचीने संस्कृतसाहित्ये अस्मिन् अर्थे पर्यावरणम् इति शब्दस्य प्रयोगः नास्ति। किन्तु पर्यावरणम् इत्यस्मिन् अर्थे परिवेशः, परिधिः, मण्डलम् इत्यादयः एव शब्दाः प्रयुक्ताः सन्ति।

यदा भगवता सृष्टिः आरब्धा तदा पञ्चमहाभूतानाम् अपि सृष्टिः कृता –

**ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम्।**
**महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ॥** [i]

अर्थात् अव्यक्तः (अगोचरः) स्वयंभूः भगवान् अन्धकारस्य नाशं कृत्वा पृथ्वी, जलम्, अग्निः, आकाशः, वायुः इति पञ्च महाभूतानि प्रकटयन् स्वयं प्रकटितः।

पृथ्वी जलम् अग्निः आकाशः वायुः चेति एतानि पञ्च महाभूतानि समग्रायाः सृष्टेः निर्माणे मुख्यभूतानि सन्ति। एतैः एव तत्त्वैः पर्यावरणस्यापि निर्माणं भवति। नद्यः, वनानि, प्राणिनः, पर्वताः, वृक्षलतादयः अपि एतेषु पञ्चसु महाभूतेषु एव अन्तर्भवन्ति। समग्रेऽपि संस्कृतवाङ्मये एतेषां पर्यावरणीयतत्त्वानां तत्र तत्र उल्लेखः कृतः अस्ति, एतानि प्रति आदरभावः प्रकटितः च, यथा अथर्ववेदे -

**सूर्यो मे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा पृथिवी शरीरम्।**

**अस्तृतो नामाहमयस्मि स आत्मानं निदधे द्यावापृथिवीभ्यां गोपीथाय ॥** [ii]

अर्थात् सूर्यः मम नेत्रम् अस्ति, वायुः प्राणः अस्ति, अन्तरिक्षम् आत्मा अस्ति पृथ्वी च मम शरीरम् अस्ति । अमृतनामा अयम् अहम् अस्मि । आकाशपृथिवीद्वारा सुरक्षायै अहम् आत्मानं भवतां अधीनीकरोमि ।

आधुनिकस्य पर्यावरणविज्ञानस्य दृष्ट्या पश्यामः चेद् पर्यावरणं परिवेशः वा द्विविधं भवति । १. भौतिकं २. जैविकं च इति । भौतिकपर्यावरणे भूमिः जलं चेत्यादीनि समस्तानि भौतिकपदार्थानि जैविकपर्यावणे च समस्तं जीवजगत् वृक्ष-वनस्पतयः च अन्तर्भवन्ति । अत्र एकैकं कृत्वा भौतिकजैविकयोः उभयोः विषये पश्यामः ।

## भौतिकं पर्यावरणम्

### भूमिः

पृथिवी जैवविविधतायाः पोषिका संरक्षिका च अस्ति । ऋषीणाम् अधोलिखितः उद्गारः भूमिरूपायाः मातुः रक्षायाः अन्तर्भावं प्रकटयति – **'माता भूमिः पुत्रोऽहं पृथिव्याः'** [iii]अर्थात् भूमिः माता अस्ति अहं तस्याः पुत्रः अस्मि । पृथिव्याः सुरक्षायाः संवेदनायाः वा अनुपमं निदर्शनं निम्नलिखितम् अस्ति –

**यतते भूमि विस्वनामि क्षिप्रं तदपि रोहतु ।**
**मा ते मर्म विमृग्वरि मा ते हृदयमर्पिषम् ॥**[iv]

अर्थात् हे भूमे ! त्वयि हलेन कर्षयित्वा यत् वयं वपनं कुर्याम तत् शीघ्रम् अङ्कुरेत् वर्धेत च । विशेषरूपेण अन्वेषणीया अस्माकं भूमिः तव मर्मस्थलेषु केनापि प्रकारेण हानिः आघातः च न भवेत् त्वयि अर्पितं मनः चित्तं चापि दुःखितं न भवेत् इति ।

### जलम्

जलं जीवनस्य प्रमुखं तत्त्वम् अस्ति । अतः वेदेषु अनेकेषु सन्दर्भेषु तस्य महत्त्वं प्रकटितम् अस्ति - '**अप्सु अन्तः अमृतम्, अप्सु भेषजम्**'[vvi] अर्थात् जले अमृतम् अस्ति, जले औषधीयगुणाः विद्यमानाः सन्ति । अस्यां धरायां प्रकृतिप्रदत्तं जलं सुखदायकं जीवनाधारं रक्षकं च अस्ति । ऋषिः मेधातिथिः काण्वः अपि तदेव कथयति –

**अप्स्वऽन्तरमृतमप्सु भेषजमपामुत प्रशस्तये देवा भवत वाजिनः ।**[vii]

अर्थात् जलस्य अन्तः अमृतम् अस्ति, जले औषधीय-गुणाः सन्ति, एतादृशस्य जलस्य प्रशंसायै हे देवाः यूयम् उत्साहिनः भवन्तु । मानवस्वास्थ्ये प्रभावजनयितॄणां नदीनाम् ऋषिभिः मातृवत् पूजा कृता आसीत् –

**याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः ।**
**ता अस्मभ्यं पयसा पिन्वमाना शिवादेवीरशिषदा**
**भवन्तु सर्वा नद्यो अशिमिदा भवन्तु ।**[viii]

अर्थात् याः नद्यः प्रवणदेशे चलन्ति याः निम्नप्रदेशेषु चलन्ति याः उदकेन पूरिताः स्युः तथा च यासु किञ्चित् जलं स्यात्, ताः नद्यः जलेन तर्पयन्त्यः अस्माकं कृते कल्याणकारिण्यः सत्यः ताः दिव्याः नद्यः शिपद-रोगहन्त्र्यः स्युः । सर्वाः नद्यः कल्याणकारिण्यः स्युः इति।

### अग्निः

वेदेषु पर्यावरणनिर्माणस्य संरक्षणस्य च आधारभूतशक्तिरूपेण अग्नितत्त्वस्य स्तुतिः कृता अस्ति । मधुच्छन्दा ऋषिणा कथितस्य ऋग्वेदस्य प्रथमः पादः '**अग्निमीळे**' अग्निसंरक्षणस्य सर्वेषां पक्षाणां व्याख्याने समर्थः अस्ति । वेदेषु एकशक्तिरूपेण अग्नेः त्रिविधानि

रूपाणि सन्ति- पार्थिवम्, अन्तरिक्षस्थानीयं द्यौस्थानीयं सूर्यः च। वेदेषु सौर – ऊर्जा पर्यावरणस्य संरक्षणे सर्वश्रेष्ठा उक्ता अस्ति। सूर्यस्य ऊर्जा द्युतिः च विकासस्य वृद्धेः च द्योतकः अस्ति इति कारणेन सर्वार्थम् अपेक्षितम् अस्ति –

**सूर्यः यतेऽर्चिस्तेन तं प्रत्यर्च।**[ix]

अर्थात् हे सूर्य! या भवतः दीपनशक्तिः अस्ति तया अस्मान् प्रदीप्तान् करोतु।

तद् एव पुष्टयति अथर्ववेदे ऋषिः – **रोहितो विश्वमिदं जज्ञान सत्त्वां राष्ट्राय सुभूतं बिभर्तु।** [x]

अर्थात् सूर्यः सर्वेषाम् उत्पादकः सर्वेषाम् अन्तः च अस्ति, येन इदं विश्वम् उत्पादितम्, एतादृशः श्रेष्ठः पोषकः सूर्यः तव राष्ट्रार्थं धारणं कुर्यात्।

सूर्य-रश्मिपानं वेदानाम् औषधिविज्ञानाय महद् योगदानम् अस्ति। ऋग्वेदे सूर्यस्य प्रातःकालस्य किरणानि रोगनिवारणार्थं समर्थाः सन्ति, अस्य वर्णनम् अस्ति –

**उद्यन्नद्य मित्रमह आरोहन्नुकपां दिवम्।**
**हृद्रोगं मम सूर्यं हरिमाणं च नाशय॥**[xi]

अर्थात् मित्रैः सत्कारयोग्यं सर्वेषाम् औषधानां रोगनिवारक-विद्यानां वा ज्ञातः हे सूर्य ! उदितः भूत्वा उपरि गगने आरुह्य अस्माकं हृदयरोगं नेत्ररोगं च नाशयतु।

## वायुः

अर्थात् जीवनार्थं पर्यावरणात् उपलभ्यमानम् आवश्यकम् ओषजनः(ऑक्सिजन) इत्येतत् वेदे प्राणवायुः इति उच्यते । वेदानुसारेण वायोः शुद्धतया स्थापनं प्रत्येकं मानवस्य कर्त्तव्यम् अस्ति। एतस्य प्रदूषकः अपराधी अक्षम्यः वा अस्ति इति। अथर्ववेदः पवनदेवं कथयति यत् वायुप्रदूषकाणि कार्याणि प्रवृत्तयः च नश्येरन् –

**वायो यत्ते तपस्तेन तं प्रतितप।**
**योऽस्मान् द्वेष्टि यं वयं द्विष्मः॥**[xii]

अर्थात् हे पवन ! यः तव प्रतापः अस्ति। तेन तस्मिन् प्रतापी भवतु। यः युष्मभ्यम् अनिष्टं कारयति अथवा येन वयम् अप्रियं कुर्मः। अन्तरिक्षाणां विकारैः वायुः अस्माकं रक्षणं करोति। अतः ऋग्वेदे वायुः प्रार्थितः अस्ति – **पातु वातो अन्तरिक्षात्।**[xiii] अर्थात् वायुः अन्तरिक्षस्य विकारेभ्यः अस्माकं रक्षणं कुर्यात्। सर्वविधाः वायवः उक्ताः – **त्रायन्तां मरुतां गणः।** हे मरुद्गणाः ! अस्माकं रक्षणं कुर्वन्तु। ईश्वरः वरं ददाति यत् हे प्राणिन् ! त्वं न दुःखी भव। सम्पूर्णा प्रकृतिः तव अनुकूला भवतु –

**तुभ्यं वातः पवतां मातरिश्वा तुभ्यं वर्षन्त्वमृतान्यापः**
**सूर्यस्ते तन्वे शं तपाति त्वां मृत्युर्दयतां मा प्रमेष्ठाः॥**[xiv]

हे पुरुष ! अन्तरिक्षे वायुः तव कृते शुद्धतया प्रवहेत्, जलधाराः अमृतवर्षां कुर्युः। तव शरीरार्थं सूर्यः शान्त्या प्रतपेत्, मृत्युः तवोपरि दयां कुर्यात्, त्वं दुःखी मा भवतु।

## जैविकं पर्यावरणम्

जैविके पर्यावरणे जीव-जन्तवः वृक्ष-वनस्पतयः च अन्तर्भवन्ति । संस्कृतसाहित्यस्य अवलोकनेन ज्ञायते यत् सम्पूर्णे संस्कृतवाङ्मये जीवसंरक्षणस्य भावना निहिता अस्ति। वैदिकसूक्तेषु बहुत्र जीव-जन्तूनां संरक्षणार्थं प्रार्थना विहिता अस्ति। यजुर्वेदे अग्निदेवताम् उद्दिश्य प्रार्थना कृता अस्ति यत् – "**शं स्य पशून् मे पाहि**"। [xv] अर्थात् – 'हे अग्नि ! मम पशूनां रक्षां कुरु' इति।

महाभारते अपि उल्लिखितम् अस्ति यत् यथा पुत्रस्य रक्षणं पित्रा क्रियते तथैव पशूनां संरक्षणं स्वामिना करणीयम् इति।

**पितृवत् पालयेद् वैश्यो युक्तः सर्वान् पशूनिह।**[xvi]

अर्थात् वैश्यः सर्वदा उद्योगशीलः भूत्वा पुत्राणां रक्षकः पिता इव सर्वविधान् पशून् पालयेत्।

अथर्ववेदे निर्दिष्टम् अस्ति यत् पशूनां कृते यत् भोज्यं तथा पेयं प्रदेयम् अस्ति तदपि स्वच्छं भवेत्। भूमौ ये कीटाः चरन्ति तेषां संरक्षणस्य भावना अपि मनुस्मृतौ निहिता अस्ति। मनुस्मृतौ एवमपि उल्लिखतम् अस्ति यत् मनुष्यैः सर्वथा सावधानेन भूमौ विचरणीयम् इति। मनुना उपदिष्टं यत् मनुष्यैः प्राणिनां हननं न करणीयम्। अहिंसया एव प्राणिनां कल्याणं भवति इति मनोः मतम् अस्ति। तथा हि उच्यते -

**अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्** [xvii]**।**

अर्थात् लोककल्याणार्थं यद् अनुशासनं करणीयं स्यात् तद् अहिंसायुक्तं स्यात्।

मनुस्मृतेः अनुसारं यः जनः जीवहिंसां न करोति सः सर्वदा सुखं प्राप्नोति –

**यो बन्धनवधक्लेशान्प्राणिनां न चिकीर्षति।**
**स सर्वस्य हितप्रेप्सुः सुखमत्यन्तमश्नुते॥**[xviii]

अर्थात् यः जनः अन्येषां जीवजन्तूनां पञ्जरेषु बन्धनं न करोति तेषां हननं न करोति तथा च तान् पीडयितुं न इच्छति। सः सर्वजीवानां हितेच्छुकः जनः अत्यन्तं सुखं प्राप्नोति।

अपि च यः जनः स्वस्य मनोरञ्जनार्थं जीवजन्तूनां हननं करोति सः न केवलं मर्त्यलोके अपि तु मृत्योः अनन्तरम् अपि दुःखी भवति –

**योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया।**
**स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते॥**[xix]

अर्थात् यः स्वस्य सुखेच्छया अहिंसकानां प्राणिनां हननं करोति। सः अस्मिन् जीवने जन्मान्तरे वा कुत्रापि सुखं न प्राप्नोति।

## वनस्पतिः

वृक्षपादपाः पर्यावरणस्य अभिन्नानि अङ्गानि सन्ति। वृक्षाणां विना मानवस्य जीवजन्तूनां वा जीवनम् असम्भवम् अस्ति। एते अस्मभ्यं प्राणवायुं (आँक्सिजन) प्रयच्छन्ति कार्बन-डाइआँक्साइड अवशोष्य पर्यावरणं शुद्धं स्वच्छं च कुर्वन्ति। श्रीमद्भागवते उक्तम् अस्ति –

**पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।**
**गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते॥**[xx]

एते वृक्षाः अस्मभ्यं पत्रं पुष्पं फलं छायां मूलं वल्कलं दारूणि गन्धं निर्यासं भस्म बीजम् अङ्कुरं च प्रदाय अस्माकं कामनाः पूरयन्ति। अत एव वृक्षाः सत्पुरुषाः इति उक्ताः –

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।**
**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥** [xxi]

वस्तुतः वृक्षाः सत्पुरुषाः इव सन्ति, स्वयम् आतपे स्थित्वा अन्येषां कृते छायां कुर्वन्ति तथा च एतेषां फलानि अपि अन्येषां कृते एव भवन्ति।

संस्कृतसाहित्ये प्रकृत्याः विविधेषु अवयवेषु वनस्पतिमानवयोः मध्ये अत्यन्तं घनिष्ठः सम्बन्धः निरूपितः वर्तते। बृहदारण्यकोपनिषदि मानववनस्पत्योः मध्ये अद्भुतस्य साम्यस्य ज्ञानवर्धकं वर्णनं वर्तते -

**यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।**
**तस्य पर्णानि लोमानि त्वगस्योत्पाटिका बहिः॥**
**त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः।**

**तस्मात्तदातुन्नात्प्रैति रसो वृक्षादिवाहतात् ॥**
**मांसान्यस्य शकराणि किनाटं स्नाव तत् स्थिरम् ।**
**अस्थीन्य तरतो दारुणि मज्जा मज्जोपमा कृता ॥** [xxii]

अर्थात् यथा वृक्षाः सन्ति तथैव मानवाः अपि। मानवशरीरे लोमाः भवन्ति वृक्षेषु च पत्राणि। शरीरे त्वचा भवति वृक्षे उत्पाटिका। तथा च पुरुषस्य त्वचः रक्तं स्रवति वृक्षस्य उत्पाटिकातः निर्यासः प्रवाहितः भवति । शरीरे मांसानि भवन्ति पादपेषु शकराणि; पुरुषे स्नायुजालानि विद्यन्ते वृक्षे किनाटानि। स्नायुजालवत् किनाटान्यपि स्थिराणि भवन्ति। पुरुषस्य स्नायुजालस्य अन्तः यथा अस्थि भवति तथैव वृक्षकिनाटस्य अन्तः काष्ठं भवति। मज्जा तु मानवशरीरे वृक्षेषु च समानरूपेण प्राप्यते।

पर्यावरणं प्रति चेतनायाः जागरणाय एव वनस्पतिषु देवत्वस्य प्रतिष्ठा कृता अस्ति। वेदाः अस्य साक्षात् प्रमाणभूताः सन्ति – **"नमो वृक्षेभ्यः"**[xxiii], **"ओषधीनां पतये नमः**[xxiv]**"**, **"नमो वन्याय च**[xxv]**"**, **"अरण्यानां पतये नमः**[xxvi]**"** । ऋग्वेदस्य दशममण्डलस्य षट्चत्वारिंशदधिकैकशततमे सूक्ते अरण्यायनी मातृवत् मता वर्तते – **"प्राह मृगाणां मातरम् अरण्यानिमशंसिषम्"**[xxvii] अर्थात् मृगाणां मातुः अरण्यायन्याः अहं स्तुतिं कुर्वे। वृक्षाः वनस्पतयः ओषधयः च सर्वेषां कृते मधुमयाः हितकारकाः शान्तिप्रदायकाः च भवेयुः – **"मधुमान्नो वनस्पतिः**[xxviii]**"**, अर्थात् वनस्पतयः अस्माकं कृते मधुराः भवेयुः। **"सुमित्रियाः न आप ओषधयः सन्तु**[xxix]**"** अर्थात् जलम् ओषधयः च अस्माकं कृते सम्यक् मित्रे स्याताम्। **ओषधयः शान्तिः वनस्पतयः शान्तिः** [xxx] ओषधयः अस्माकं कृते शान्तिदायकाः स्युः, वनस्पतयः अस्माकं कृते शान्तिदायकाः स्युः। **"माध्वीर्नः सन्त्वोषधीः**[xxxi]**"** अर्थात् ओषधयः अस्माकं कृते मधुरताम् आनेयुः।

ऋषिभिः वेदेषु न केवलं प्राकृतिकतत्त्वेषु देवत्त्वस्य भावना कृता अपि तु ततोऽप्यधिकं मानव-सम्बन्धस्य स्नेहिल-मार्गः प्रदर्शितः। वैदिकसाहित्ये विशेषतया माता, पिता, पुत्रः, मित्रं सहोदरः चेत्यादीनां भावानां निरूपणं दृश्यते। विश्वस्य भर्तारः पोषकाः च औषधयः मातुः समं रक्षां कुर्वन्ति –

**औषधिरिति मातरस्तद्वो देवीरुपब्रुवे।** [xxxii]

हे दिव्यगुणैः युक्ताः ओषधयः! यूयं मातुः समाः हितकारिण्यः स्थ। अहं युष्मभ्यम् एवं कथयामि।

महाभारते वृक्षान् धर्मपुत्रान् मत्वा एतेषां संरोपणं संवर्धनम् अत्यन्तं श्रेयस्करं कथितम् अस्ति -

**तस्य पुत्रा भवन्त्येते पादपा नात्र संशयः।**
**परलोकगतः स्वर्गं लोकांश्चाप्नोति सोऽव्ययान् ॥** [xxxiii]

यः वृक्षान् रोपयति तस्य कृते वृक्षाः पुत्ररूपाः भवन्ति इत्यत्र नास्ति संशयः। अत एव परलोके गते तेन स्वर्गलोकः अक्षयपुण्यं च प्राप्यते।

विकासस्य प्रतिस्पर्द्धायां वृक्षाणाम् अत्यधिकं कर्तनं जायमानम् अस्ति । तेषां संरक्षणाय तत्र कश्चन प्रतिबन्धः अपेक्ष्यते । संस्कृतसाहित्यस्य परिशीलनं कुर्मः चेत् एतां समस्यां वयं परिहर्तुं शक्ष्यामः। अनेकैः उद्धरणैः ज्ञायते यत् वृक्षाणां कर्तने निषेधः आसीत् इति। वृक्षच्छेदनं फलत्रोटनं वनस्पतिनाशः वा दण्डनीयः आसीत्। मत्स्यपुराण-अग्निपुराण-वराहपुराण-ब्रह्मवैवर्तपुराण-भविष्यपुराण-मनुस्मृति-याज्ञवल्क्यस्मृतिषु अस्य विस्तरेण विवेचनं लभ्यते। यथा –

**वृक्षं तु सफलं छित्त्वा सुवर्णं दण्डमर्हति।**
**द्विगुणं दण्डयेच्चैनं पथिसीम्नि जलाशये ॥**[xxxiv]

फलसहितः वृक्षः कर्तितः चेत् अपराधी सुवर्णेन दण्डनीयः । यदि सः वृक्षः कस्यचित् सीम्नः मार्गस्य जलाशयस्य वा समीपे अस्ति चेत् सः द्विगुणिततया दण्डनीयः ।

अग्निपुराणम् अपि एतद् एव पुष्टयति ।

**प्ररोहिशाखिनां शाखास्कन्ध सर्वविदारणे ।**
**उपजीव्यद्रुमाणान्तु विंशतेर्द्विगुणा दमाः ॥** (अग्नि.पु.२५८/२५)

ये वृक्षाः शाखां कर्तयित्वा पृथक्-रोपणेन अङ्कुरिताः भवन्ति एतादृशाः दुग्धवन्तः वृक्षाः प्ररोहिशाखी इति उच्यन्ते । तेषां प्ररोहिशाखिनां वृक्षाणां तथा येषां शाखाः अङ्कुरिताः न भवन्ति किन्तु जीविकायाः साधनानि भवन्ति एतादृशाणां वृक्षाणां कर्तने विंशतिः पणानि दण्डनीयानि, स्कन्ध-छेदने चत्वारिंशत्-पणानि तथा च तस्य मूलच्छेदे अशीतिः पणानि दण्डनीयानि ।

*****************

**सन्दर्भग्रन्थाः**

ऋग्वेद का सुबोधभाष्य (प्रकाशनम्) – वसन्तश्रीपाद-सातवलेकर स्वाध्यायमण्डल पारडी, जि.बलसाडः
अथर्ववेद का सुबोध भाष्य (प्रकाशनम्) – वसन्तश्रीपाद- सातवलेकर स्वाध्यायमण्डल पारडी, जि.बलसाडः
यजुर्वेद (प्रकाशनम्) - संस्कृतसाहित्य प्रकाशन विश्वविजय प्रा.लि. एम- 12, कनाट सरकस, नई दिल्ली – ११०००१
मनुस्मृतिः (प्रकाशनम्) - वैजनाथ केडिया प्रोपाइटर हिन्दी पुस्तक एजेन्सी १२६, हरिसन रोड, कलकत्ता ।
श्रीमद्भागवतम् (प्रकाशनम्) - गीताप्रेस, गोरखपुर – २७३०००५
महाभारतम् (प्रकाशनम्) - गीताप्रेस, गोरखपुर – २७३००५
मत्स्यपुराणम् (प्रकाशनम्) - गीताप्रेस, गोरखपुर - २७३००५

.[i] मनुस्मृतिः १/६
[ii] अथर्ववेदः ०५/०९/०७

[iii] अथर्ववेदः १२/०१/३५
[iv] अथर्ववेदः १२/०१/३५
[v] ऋग्वेदः ०१/२३/२४८

[vii] ऋग्वेदः ०१/२३/१९
[viii] ऋग्वेदः ०७/५०/०४
[ix] अथर्ववेदः ०२/२१/०३
[x] अथर्ववेदः ०४/०१/०१
[xi] ऋग्वेदः ०५/५०/११
[xii] अथर्ववेदः ०२/२०/०१
[xiii] ऋग्वेदः १०/१५८/०१
[xiv] अथर्ववेदः ०८/०१/०५
[xv] यजुर्वेदः ०३/३७
[xvi] महाभारतम्,शान्तिपर्व ६०/२२,२३

---

[xvii] मनुस्मृतिः ०२/१५९
[xviii] मनुस्मृतिः ०५/४६
[xix] मनुस्मृतिः ०५/४५
[xx] श्रीमद्भागवतम् १०/२२/३४
[xxi] विक्रमाङ्कदेवचरितम्
[xxii] बृहदारण्योकोपनिषद् ०३/०९/१-३
[xxiii] यजुर्वेदः १६/१७
[xxiv] यजुर्वेदः १६/१९
[xxv] यजुर्वेदः १६/३४
[xxvi] यजुर्वेदः १६/२०
[xxvii] ऋग्वेदः ०१/१४६/०६
[xxviii] ऋग्वेदः ०१/९०/०८
[xxix] यजुर्वेदः ३६/२३
[xxx] यजुर्वेदः ३६/३७
[xxxi] ऋग्वेदः ०१/०९/०६
[xxxii] ऋग्वेदः १०/९७/०४
[xxxiii] महाभारतम्,अनुशा. ५८/२७
[xxxiv] मत्स्यपुराणम् २२७/९१